# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – साहित्यम्** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – चम्पूरामायणम् (बालकाण्डम्)** | |

सूचना - **निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समान गुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः पद्ययोः व्याख्यां कुरुत।**

१ वाल्मीकिगीतरघुपुङ्गवकीर्तिलेशैस्तृप्तिं करोमि कथमप्यधुना बुधानाम्।
गङ्गाजलैर्भुवि भगीरथयत्नलब्धैः किं तर्पणं न विदधाति नरः पितॄणाम्॥

२ नारायणाय नलिनायतलोचनाय नामावशेषितमहाबलिवैभवाय।
नानाचराचरविधायकजन्मदेशनाभीपुटाय पुरुषाय नमः परस्मै॥

३ अथ रामाभिधानेन कवेः सुरभयन् गिरः।
अलङ्चकार कारुण्याद्रघूणामन्वयं हरिः॥

४ भरतस्तेषु कैकेय्यास्तनयो विनयोज्वलः।
अन्यौ लक्ष्मणशत्रुघ्नौ सुमित्रायां कृतोदयौ॥

**प्रश्नः २** भोजदेवस्य जीवनकवनं यथाधीतं सविस्तरं वर्णयत।

**प्रश्नः ३** देवैः कृतं भगवतः विष्णोः स्तवनं वर्णयत।

**प्रश्नः ४** भगवतः रामजन्मवृत्तान्तं विवृणुत।

**प्रश्नः ५** रामलक्ष्मणयोः पराक्रमं राक्षसवधं च यथाग्रन्थं प्रतिपादयत।

**प्रश्नः ६ अधोलिखितेषु द्वयोः पद्ययोः व्याख्या कार्या।**

१ पुरा मनोरमा नाम सुमेरोरभवत्सुता।
गृहमेधी तयैवासीच्चक्रवर्ती धराभृताम्॥

२ दिलीपेऽपि दिवं याते श्रुत्वा वृत्तं भगीरथः।
अमर्त्यसरितं कर्तुं मेने मर्त्यतरङ्गिणीम्॥

३ असौ वसिष्ठनिर्देशाद् ब्रह्मर्षित्वमविन्दत ।
यथोपनयनसंस्काराद् द्विजन्मा ब्रह्मवर्चसम् ॥

४ ततो भरतशत्रुघ्नौ कुशध्वजनियोगतः ।
माण्डवीश्रुतकीर्तिभ्यामभूतां गृहमेधिनौ ॥

प्रश्नः ७ गङ्गाऽवतरणकथां सविशदं वर्णयत ।

प्रश्नः ८ चम्पूरामायणमाश्रित्य सगराख्यानं विवेचयत ।

प्रश्नः ९ भगवतः श्रीरामस्य विवाहवर्णनं सविशदं कुरुत ।

प्रश्नः १० परशुरामाख्यानं वर्णयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ चम्पूरामायणस्य कर्ता कः ?
२ चम्पूरामायणे कति काण्डानि सन्ति ?
३ भोजदेवेन कति काण्डानां रचना कृता ?
४ षष्ठकाण्डस्य रचना केन कृता ?
५ रघुवंशीयराज्ञां राजधानी का ?
६ वज्रम् कस्य आयुधं वर्तते ?
७ दशरथेन कः यज्ञः कृतः ?
८ कस्मिन् नक्षत्रे भगवतः रामस्य जन्म अभवत् ?
९ भरतस्य मातुः नाम किम् ?
१० रघुवंशीयराज्ञां कुलपुरोहितः कः ?
११ जनकः कस्याः नगर्याः राजा आसीत् ?
१२ भरतस्य विवाहः कया सह जातः ?
१३ जनकस्य अनुजः कः ?
१४ परशुरामस्य पितुः नाम किम् ?
१५ बालकाण्डे कति श्लोकाः सन्ति ?

****